# श्री सत्यप्रमोद स्तोत्रं

1. ज्ञानभक्त्यादि वैराग्य सद्गुणाब्धिं यतीश्वरम् ।
श्री सत्यप्रमोदतीर्थाख्यं वंदे ज्ञानाभिवृद्धये ॥
2. देशे परमतवादिवर्यशतकं व्यामोहयन् भर्त्सयन् ।
श्री मध्वागम शैलतुंगशिखरे वसन् संतुष्टो मुदा ॥
वादिव्रात पराबवैक निपुण व्याख्यानयोद्भासित ।
सत्यप्रमोद यतींद्र सिंहसदृशो दद्यात् सदा मे मुदं ॥
3. वैराग्यादि गुणोपेतं जयतीर्थगुरुप्रियं ।
सुधाप्रवचनासक्तं मोदतीर्थं गुरुं भजे ॥
4. सच्छास्त्रप्रवचनासक्तः प्रतिवादी भयंकरः ।
देवो वा देवतांशो वा मोदतीर्थः न मानवः ॥
5. यस्य दर्शन मात्रेण ज्ञानाग्निः ज्वलते खलु ।
स यतींद्र प्रमोदाख्यो राजते गुरु सन्निधौ ॥
6. गीर्वाणभाषाव्याकरणे अद्वितीयो यतीश्वरः ।
सत्यात्मतीर्थैः संपूज्यो भासते गुरुसन्निधौ ॥
7. शापानुग्रहशक्तोऽसौ सत्याभिज्ञस्य पुत्रकः ।
सत्यप्रमोदतीर्थाख्यो भासतं मे हृदंबरे ॥
8. श्री मूलरामपादाब्जं पंचाशत् वर्षपूजकः ।
तिरुकोयिलूरुसुक्षेत्रे राजते शस्त्रकोविदः ॥
9. सत्यप्रमोदतीर्थाणां हृदयाब्जाऽमलमंदिरः ।
नरसिंहो रमाकांतः प्रीयतां स्तोत्रमालया ॥

इति एरी सुब्बण्णाचार्यकृतं श्री सत्यप्रमोद स्तोत्रम्